CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दिग्दर्शिनी



नीलाचलेन्द्रनिलयः पुरुषोत्तमोऽयं
कोणार्कमन्दिरपतिश्च जगत्प्रदीपः ।
स्वर्णाचलाधिपतिरेष च लिङ्गराजो
दिग्दर्शिनीं परममी परिपान्तु नित्यम् ।।

उत्कलसंस्कृतगवेषणासमाजस्य त्रैमासिकमुखपत्रम्

पुरी, उत्कलः

सम्पादकः आचार्य्यव्रजकिशोरस्वाईं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varànasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



सा संस्कृति र्विश्ववारा- यजुर्वेद: ७/१४

संपादक: - आचार्यव्रजकिशोरस्वाईं

मङ्गलाचरणम्

प्रमाणं सतां साङ्ख्यतत्त्वव्रतानां
परं विश्ववन्द्यं त्वमाद्यन्तहीनम् ।
शिवं शान्तरूपं जरामृत्युशून्यं
विशुद्धं प्रधानं परं चित्स्वरूपम् ।।१।।
पदं योगभाजां तपोलभ्यमेषां
सत्यं प्रश्नलक्ष्यं त्वमेव प्रणम्यम् ।
जगत्प्राणहेतुस्त्वमेवासि नित्यं
महायोगसार: स्थितनिर्विकल्पम् ।।२।।
बुधैस्तर्कनिष्णातधीभि: पुराणै:
प्रयत्नेन सिद्धान्तितं युक्तिसारै: ।
त्वमेवासि नि:श्रेयसं कारणं वा
त्रिदु:खानिवृत्तिस्वरूपादिभूतम् ।।३।।
पदार्थान् समालोच्य वैशेषिकैर्यं
परं तत्त्वमाप्तं तदेकं त्वमेव ।
श्रुतं मानगम्यं विशेषाभिधानं
तवैव स्वरूपं न चान्यद् विभाति ।।४।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रुतेरर्थजातस्य विश्लेषणार्थं
गतिः कर्ममीमांसकैर्योपदिष्टा ।
प्रशान्तं सुरूपं तवैतत्स्वरूपं
त्वमीशः परेशो नृपेशो भवेशः ।।५।।
प्रसिद्धश्च वैदिन्तिकानां यदाद्यं
सदद्वैतमन्यादृशं वापि तत्त्वम् ।
परब्रह्मणस्ते स्वरूपं विदित्वा
तदैवेति मुक्तिं गतो जीवलोकः ।।६।।
नमः शिवायेति नमन्ति शैवाः
पतिं पशूनं यमनाद्यमाद्यम् ।
सत्वं शिवाद्वैतमयो महेश-
स्त्वमीशरूपं परमं प्रधानम् ।।७।।
चार्वाकमुख्याः प्रवदन्ति केचि-
द्बृहस्पतेर्यन् मतमाददानाः ।
दैवादि मिथ्या सकलः स्वभावः
स च स्वभावस्तव देव लीला ।।८।।
अहंस्त्वमेवासि परस्वरूप-
स्त्रिरत्नमप्यर्घ्यतमं त्वमे ।
प्रसिद्धहेतुस्त्वमन्तरूप
जडोऽजडात्मा परमाणुरेव ।।९।।
बौधैः प्रदिष्टः सुविशुद्धबोधिः
प्रज्ञादिमार्गप्रतिरूढतत्त्वम् ।
दुःखाभिस्कन्धं प्रसमाप्तिमूलं
महानिदानं भवतः स्वरूपम् ।।१०।।
अजीवकं तत्त्वमिदं निरूढ-
मूर्ध्वे मनुष्यो जनिमृन्निकाये ।
मन्त्रः स चायं तव वाक्यमन्त्रा-
न्न भिन्नतामेति महतत्त्वहेतुः ।।११।।
दृश्यते दर्शनैः सर्वैर्यस्य श्रीपदपङ्कजं
तत्रैवास्तां मतिनित्यं गोपालस्य परात्परे ।
नाम संकीर्तनायैव महिम्नः स्तोत्रमुत्तमं
पुरुषोत्तमनाम्नस्ते सर्वत्र जयति ध्रुवम् ।।१२।।

_O_

श्रीपुरुषोत्तममहिम्नः स्तोत्रम्

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दिग्दर्शिनी. 2004/3
Regd, No.34194/79

श्रीपुरुषोत्तमजगन्नाथदर्शनस्य आगमिकभित्तिः*

व्रजकिशोरस्वाईं, पुरी

०. भारतवर्षस्य धार्मिकी परंपरा भागद्वयेन विभक्ता, तयोरेका वैदिकीपरंपरा (निगमपरंपरा) अन्या तान्त्रिकी परंपरा । तान्त्रिकीपरंपरा आगमपरंपरानाम्ना अभिधीयते । उभयविधयोः परंपरयोः ऐतिहासिकभित्तेः पार्थक्ये सत्यपि उभयोरुद्भवकाल एक इति ऐतिहासिका आमनन्ति[1] । इतरे केचन ऐतिहासिका वैदिकपरंपरापेक्षया आगमपरंपराया अर्वाचीनतां समर्थयन्ति[2] । यद् वा भवतु उभयविधयोः परंपरयोः धर्मशास्त्रमाध्यमेन सामाजिकी स्वीकृतिः स्पष्टा । वैदिकपरंपरायाः सामाजिकी स्वीकृतिर्यदि वा मनुमारभ्य[3] प्राप्यते तथापि आगम (तान्त्रिक) परंपरायाः सामाजिकी स्वीकृति हारीतमारभ्य उपलभ्यते[4] । ऋषि हारीतो वैदिकपरंपरया सह आगमपरंपरायाः समप्राधान्यं प्रतिपादयति[5] । अस्यां स्थितौ वैदिकपरंपरायाः प्राचीनतया सह आगमपरंपरायाः प्राचीनता प्रायेण समाना इति अवगम्यते । ये केचन आगमपरंपरायाः अर्वाचीनतां स्वीकुर्वन्ति ते आगमशास्त्रं स्मृतिदृष्ट्या अवगच्छन्ति[6] । तेन हेतुना धार्मिकपरिचर्यायां सामाजिक-स्वीकृत्यर्थं त्रिविधा स्मार्तपरंपरा ऐतिहासिकैरामन्यते- यथा वैदिक-स्मार्तपरंपरा, पौराणिकस्मार्तपरंपरा आगमिकस्मार्तपरंपरा चेति[7] ।

1. आगमिकस्मार्तपरंपरा आगमपरंपरानाम्ना ख्याता । अस्यां परंपरायां पञ्चदेवतोपासना प्रवर्तिता[8] । तत्र शाक्त-शैव-वैष्णवानां शांखाः

---

* Presented in National Seminor on "Sri Jagannath" organised by Rastriya Sanskrit Vidyapith, Tirupati (AP) on 2,3,4-7-2004.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अतिप्राधान्यं भजन्ते[9] । आसु शाखासु शाक्तपरंपरायां शक्तिः, शैवपरंपरायां शिवः, वैष्णवपरंपरायां च विष्णुरुपास्यदेवतात्वेन वर्तन्ते । अत्र विष्णु-कैन्द्रिकी आगमपरंपरा वैष्णवागमपरंपरा । अस्याः आगमपरंपरायाः शाखाद्वयं विराजते । तयोरेका वैस्वानसपरंपरा अपरा पाञ्चरात्रपरंपरा चेति। वैखानसागमे विष्णोः स्थितेः, मर्यादायाः, महिम्नश्च वर्णनं प्राप्यते । पाञ्चरात्रागमे विष्णोः मूर्तिपूजा, मन्दिरेषु तन्मूर्तेः प्रतिष्ठा उपासना चेति विषयाणामुपन्यासो वर्तते[10] । सन्दर्भेऽस्मिन् 'आगमपरंपरा' इत्युक्ते पाञ्चरात्रागमः, 'पुरुषोत्तमः' इत्युक्ते श्रीजगन्नाथः, नवकलेवर इत्युक्तेः पुरुषोत्तमविग्रहस्य प्रतिष्ठेति अवगन्तव्यम् । विमर्शावसरे पुर्यां श्रीपुरुषोत्तम-जगन्नाथस्य उपासनायां विद्यमानायाः सांप्रतिकपरंपरायाः आगमशास्त्रीयभित्तेः उपस्थापनाय प्रयासः करिष्यते ।

2. वैखानसागमस्य प्रवर्तको विखनाः भृगु-कश्यपात्रि-मरीच्याख्यान् चतुरः शिष्यान् विष्णूपासनाविषयमुपदिदेश । परवर्तिनि काले तैः या आगमसंहिता विरचिताः ताः तत्तन्नाम्ना व्यपदिष्टाः सञ्जाताः । आसु संहितासु मन्दिरनिर्माणार्थं नानाविधोपकरणानां मनोनयनं, मूर्तिनिर्माण-साधनानि, देवताविधिः, अर्पणीयपदर्थश्चेत्यादिविषयाणां विस्तारेण सूचना प्रदत्ताऽस्ते । वैखानसाः साधारणतया धर्मशास्त्र-गृह्यसूत्र-शुल्बसूत्राणा-मवलम्बनेन नानाविधान् ग्रन्थान् प्रणीतवन्तः । एतेषु ग्रन्थेषु वैदिकमन्त्राणां व्यवहारः प्राप्यते । वैदिकवर्णाश्रमव्यवस्थायां येषां वैदिककर्मकाण्डेषु अधिकारो न वर्तते तेषां वैखानसागमोक्तविधिषु प्रायेण अधिकारो नास्ते । आपाततो येषां वैदिकाग्निहोत्रानुष्ठाने अधिकारो नास्ति तेषामागमोक्तमूर्ति-पूजासु अधिकारः स्वीक्रियते[11] ।

3. वैखानसागमपरंपरातः पाञ्चरात्रागमपरंपरा भिन्ना। एतत्परं-परानुसारं मन्दिरेषु गृहस्थाश्रमेषु च देवतानां पूजा व्यवस्थापिता ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पाञ्चरात्रागमे चत्वारो वेदाः साङ्ख्यप्रतिपादितानि तत्त्वानि स्वीकृतिं भजन्ते[12]। ईश्वरसंहिताया (21.31) मुल्लिखितमस्ति यत् शाण्डिल्यः, अनुपगायनः, मौञ्जायनः, कौशिकः, भरद्वाजश्चेति पञ्च शिष्यान् स्वयं नारायणः आगम-विषयानुपदिदेश, इति हेतोरस्य नाम पाञ्चरात्रागम इति फलितम्[13]। पक्षान्तरे किम्बदन्तीसूत्रादवगम्यते यत् नारायणात् अनन्त-गरुड-विश्वक्सेन-शिव-ब्रह्मभिः पञ्चसु रात्रिषु अस्यागमशास्त्रस्य श्रुतत्वात् अस्य पाञ्चरात्रागम इति संज्ञा। अत्र रात्रशब्दो ज्ञानवाची। परमात्मनो मुक्तेर्भक्तेर्योगस्य संसारस्य च विषये अस्मात् शास्त्राद् ज्ञानोपलब्धेरस्य पाञ्चरात्रागम इति संज्ञां केचन समर्थयन्ति। यद् वा भवतु। महाभारतस्य शान्तिपर्वणो मोक्षधर्मप्रकरणे (339.11-12) नारायणीयप्रक्रमात् पाञ्चरात्रागमस्य विकाशस्तात्पर्यं च प्राप्येते।

4. आगमपरंपरायां यावत्यः संहिताः प्रणीतास्तासां विषयाश्चतुर्धा विभक्ताः। यथा ज्ञानं (Knowledge), योगः (Concentration), क्रिया (Making), चर्या (Doing) च। एतेषु ज्ञानप्रकरणे भगवतः विषये, योगप्रकरणे उपासनाविषये, क्रियाप्रकरणे मन्दिरनिर्माण-विषये, देवविग्रहस्य निर्माणं प्रतिष्ठा चेति विषययोः चर्याप्रकरणे च उपासनापद्धतिविषये वर्णनं प्राप्यते[14]। अस्मिन् प्रबन्धे क्रियाचर्या-प्रकरणस्थविषयानुपजीव्य कश्चन विचारः प्रस्तोतुमिष्यते।

5. पाञ्चरात्रपरंपरायां विष्णुना सह तच्छक्तित्वेन श्रीलक्ष्मीः सर्वदा विद्यते। उभयोः मिथः सश्लेष इत्थं विद्यते येन एकोऽन्यं त्यक्तुं न शक्नोति। अस्याः शक्तेः कार्यान्वयनं भक्ति-निष्ठशक्त्या क्रिया-निष्ठशक्त्या च संभवति। भक्तिशक्तिः विष्णोरिच्छाशक्तित्वेन सृष्टिकर्मणि कार्यान्विता भवति[15]। क्रियाशक्त्या सृष्टेरुद्देश्यं सूच्यते। भगवतः क्रियाशक्त्या तदीय-कर्मफलदातृत्वं व्यज्यते।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

6. आगमपरंपरायां यावन्तो विषयाः विकाशं प्राप्ताः तेषु विष्णुसंबन्धीया विषया अत्यन्तं चिन्ताघटका भवन्ति । अस्यां परंपरायां प्रवर्तिता उपासना विष्णुं, नृसिंहं, पुरुषोत्तमं च आश्रित्य विद्यते । ख्रीष्टीयदशमशतके काश्मीरप्रान्ते निवसता श्रीलक्ष्मणदेशिकेन्द्रेण प्रणीते शारदातिलकग्रन्थे विषयेऽस्मिन् सूचना प्राप्यते[16] । उत्कलमण्डलस्य धार्मिकपरंपरायाः नियन्त्रणं प्रायेण एतस्य ग्रन्थरत्नस्य प्रभावेण प्रभावितम्[17] । शारदातिलकस्य पञ्चदशे पटले श्रीविष्णोः, षोडशे पटले श्रीनृसिंहस्य, सप्तदशे पटले च श्रीपुरुषोत्तमस्य उपासनाविषयोऽतीवप्राञ्जलरीत्या प्रदत्तो वर्त्तते । श्रीविष्णुप्रकरणे (पञ्चदशे पटले) उपास्यदेवतात्वेन वासुदेवः, दधिवामनः, हयग्रीवः, वराहः, श्रीरामः, हनुमांश्चेति विद्यन्ते । श्रीनृसिंहप्रकरणे (षोडशे पटले) श्रीनृसिंहेन सह श्रीहनुमान् उपास्यत्वेन वर्तते । किन्तु सप्तदशे पटले श्रीपुरुषोत्तमप्रकरणे श्रीपुरुषोत्तमस्य उपासनाविषये त्रैलोक्यमोहनस्य, श्रीहृषीकेश इत्यपरपर्यायस्य श्रीधरस्य कामत्वेन श्रीकृष्णस्य च उपासना विषयोऽवतारितः । वस्तुतः भगवत्तत्त्वं श्रीविष्णौ, उग्रतत्त्वं भयानकतत्त्वं वा श्रीनृसिंहे, श्रीमोहनतत्त्वं च श्रीपुरुषोत्तमे अनुभूयन्ते[18] ।

7. पुरुषेषु उत्तमत्वात् पुरुषोत्तमस्य सार्ङ्ख्यदर्शनप्रतिपादित-बहुपुरुषवादेन सह कश्चन संबन्धो विद्यते इति प्रतिभाति । अस्मिन् स्थले प्रकृति-पुरुषयोः सम्मिलिततत्त्वमेव स्वीकृतम् । यतः पुरुषवियुक्ता प्रकृतिः शवतुल्या । शारदातिलके श्रीपुरुषोत्तमस्य शक्तित्वेन श्रीलक्ष्मीरभिहिता[19] । प्रकारान्तरे श्रीधरतत्त्वं श्रीकरतत्त्वत्वेन श्रीहृषीकेशतत्त्वत्वेन वा व्यपदिश्यते। यदा श्रीविष्णुः श्रीकृष्णत्वेन उपास्यते तदा गोपिकाः तस्य शक्तित्वेन प्रकल्प्यन्ते । कामतत्त्वे स्वयं श्रीविष्णुः त्रैलोक्यमोहनत्वेन अभिलष्यते । किन्तु पुरुषोत्तमोपासनायां कामस्य विष्णोश्च युगपत् सम्मिलितत्वं लक्षीक्रियते । अतः श्रीपुरुषोत्तमे श्रीपतेः, श्रीकृष्णस्य, कामस्य च

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लक्षणमविनाभावसम्बन्धेन विद्यते। श्रीपुरुषोत्तमजगन्नाथस्य उपासनायामेतत्-त्रिविधलक्षणस्य समन्वितत्वात् आगमपरंपरायां 'पुरी' उपासनाक्षेत्रत्वेन पुरुषोत्तमक्षेत्रम्, उपास्यत्वेन पुरुषोत्तमजगन्नाथो प्रसिद्धिं प्राप्नुतः ।

8. शारदातिलकवर्णितपुरुषोत्तमस्य श्रीधरतत्त्वमतीवगम्भीरम्। एतत्तत्त्वं त्रैलोक्यमोहनतत्त्वस्य अंशमात्रम् । अस्मिन् तत्त्वे वैदिकः प्रभावोऽधिकः, तान्त्रिकः प्रभावश्च लघुरिति मन्यते । अस्मिन् तत्त्वे श्रीविष्णोः "भगवद्वासुदेव"त्वेन उपासना क्रियते । अष्टदलपद्मविशिष्टे यन्त्रे उपविश्य साधकप्रवरेण श्रीधृति-रति-कान्त्याख्यचतुःशक्तिसहितानां श्रीपुरुषोत्तम-भगवद्वासुदेवानामुपासना क्रियते । किन्तु त्रैलोक्यमोहनतत्त्वे विष्णुपुरुषोत्तमो द्विभुजत्वेन श्रीधरयन्त्रे च चतुर्भुजत्वेन उपास्यते । विष्णुः चतुर्षु भुजेषु शङ्ख-चक्र-गदा-पद्मानि धारयति । अत्रेदमेव वक्तव्यं यत् वस्तुतः पुरुषोत्तमजगन्नाथो द्विभुजात्मकः । स त्रैलोक्यमोहनतत्त्वे उपास्यते। यदा नानाविधैः वेशैः सोऽर्च्यते तदा तस्य चत्वारो भुजाः कल्प्यन्ते, तत्र शङ्खचक्रगदापद्मानि संबध्यन्ते । तदानीं स च श्रीधरयन्त्रे स्थाप्यते । अस्यामुपासनाया मङ्गन्यासादिकर्मसु पुरुषसूक्तस्य अनिर्वार्यतया पाठः क्रियते[20] ।

9. रतिदेवकामदृष्ट्वा पुरुषोत्तमजगन्नाथस्य उपासना यदा क्रियते तदा तस्य त्रैलोक्यमोहनकृष्णपुरुषोत्तमत्वेन भावना क्रियते । किन्तु त्रैलोक्यमोहनविष्णोः उपासनायां कर्मकाण्डस्य नानाविधीनां कालक्रमेण बहुलत्वेन दृष्टत्वेऽपि त्रैलोक्यमोहनकृष्णोपासनायां तद्विधीनां लघुत्व-मनुभूयते । शास्त्रीयविध्यपेक्षया लोकाचारस्य प्राधान्यं तत्र भूयस्त्वेन प्राप्यते। श्रीपुरुषोत्तमजगन्नाथस्य त्रैलोक्यमोहनकृष्णोपासनायां लोकाचारस्य बाहुल्य-मित्थं वर्धितं यत् श्रीजगन्नाथस्य नानाविधा वेशाः केवलं लोकाचारमाश्रित्य अनुष्ठीयमाना दृश्यन्ते ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

10. कामस्य वर्णो लोहितः । श्रीपुरुषोत्तमस्य कामतत्त्व-भित्तिकध्याने श्रीजगन्नाथस्य श्रीविग्रहो नानाविधरत्नैर्विमण्डितः क्रियते, न केवलमेतत्, अपितु सोऽपि चतुर्भुजविशिष्टः परिकल्प्यते । कामस्य बीजं क्लीं, स यस्मिन् अष्टदलपद्मविशिष्टचक्रे अर्च्यते तस्य बहिर्भागेषु षोडशदलानि स्युः । यद् वा भवतु । कामेन सह तस्य तिस्रः शक्तयः संबद्धास्तिष्ठन्ति । तासु प्रथमायाः शक्तेः अष्टौ पीठशक्तयः सन्ति । ताः भवन्ति मोहिनी, क्षोभिनी, स्तम्भिनी, आकर्षिणी, द्राविणी, उन्मादिनी, क्लीन्ना, क्लेदिनी च । एताः शक्तयः कामपुरुषोत्तमस्य उपासनायां मैथुनाचारस्य नानाविभावानां स्रष्ट्र्यो भवन्ति । द्वितीयायाः शक्तेरपि अष्टौ पीठशक्तयः सन्ति । ताः पद्मस्य अष्टसु दलेषु अधिष्ठिता भवन्ति । ताः पीठशक्तयो भवन्ति अनङ्गरूपा, अनङ्गमदना, अनङ्गमन्मथा, अनङ्गकुसुमा, अनङ्गमदनातुरा, अनङ्गशिशिरा, अनङ्गमेखला, अनङ्गदीपिका चेति । तृतीयशक्तेः संभूय षोडशपीठशक्तयः सन्ति । ताः षोडशदलपद्मस्य बहिर्दलमण्डलेषु विराजन्ते । ताः भवन्ति युवती, विप्रलम्भा, सुभ्रूः, मदद्रवा, सुरता, वारुणी, लोला, कान्तिरिति प्रभृतयः । एताः पीठशक्तयः स्वस्वहस्तेषु पद्मपुष्पाणि धारयन्ति[21] । पक्षान्तरे एताः षोडशपीठशक्तयः कामबीजयुक्त-पुरुषोत्तमजगन्नाथस्य एकैका कला । तेन हेतुना श्रीजगन्नाथः षोडशकलत्वेन परिपूर्णत्वेन च व्यपदिश्यते ।

11. श्रीजगन्नाथस्य पूजायां पुरुषोत्तमकामतत्त्वस्य प्रबलः प्रभावोऽनुभूयते । अस्यां पूजायां सुभद्रा भुवनेश्वरीनाम्ना व्यपदिष्टा । तया सह कामतत्त्वस्य संबन्धो वर्तते । भुवनेश्वरीमन्त्रे कामस्य अष्टौ पीठशक्तयः सन्ति । अष्टदलपद्मे अनङ्गकुसुमा, अनङ्गकुसुमातुरा, अनङ्गमदना, अनङ्गमदनातुरा, अनङ्गवेद्या च स्थानं प्राप्ताः, षोडशदलपद्मेऽनङ्गरूपा, अनङ्गमदना, अनङ्गमदनातुरा, अनङ्गवेदना, अनङ्गमेखला च अधिष्ठिताः[22] ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीजगन्नाथमन्दिरे श्रीपुरुषोत्तमेन सह श्रीभुवनेश्वरीमन्त्रेण[23] श्रीसुभद्रायाः पूजितत्वेऽपि शारदातिलकस्थकामदेवपद्धतेः केचन विशिष्टोंऽशोऽत्र परिगृहीत इति लक्ष्यते ।

12. यद् वा भवतु श्रीपुरुषोत्तमजगन्नाथस्य श्रीकृष्णत्वेन उपासनामाधृत्य पौनःपुनिकतया अनुसन्धानमपेक्ष्यते । श्रीकृष्णस्य गोपिकाभिः सह विद्यमानात् संबन्धात् त्रैलोक्यमोहनतत्त्वमवतारितम् । ततः श्रीकृष्णः गोपीजनबल्लभनाम्ना व्यपदिश्यते । श्रीकृष्णस्य उपासनायां षट्प्रकारका मन्त्राः व्यवह्रियन्ते[24] । ते षडक्षरमन्त्रः, अष्टाक्षरमन्त्रः, दशाक्षरमन्त्रः, षोडशाक्षरमन्त्रः, अष्टादशाक्षरमन्त्रः, द्वात्रिंशाक्षरमन्त्रश्चेति । सर्वेषु मन्त्रेषु कामबीजत्वेन 'क्लीं', 'गोपीजनबल्लभ' इति पदद्वयं व्यवहृतं दृश्यते। अयं मन्त्रः प्रद्युम्नमन्त्रत्वेन ख्यातः यस्मिन् मन्त्रे त्रैलोक्यमोहनो जगन्मोहनत्वेन व्यपदिष्टः । एतादृशं नामादर्शं स्वीकृत्य श्रीजगन्नाथमन्दिरस्य शिल्पशास्त्रे नाट्यमण्डपो श्रीजगन्मोहन इत्युच्यते ।

13. इदमत्र वक्तुं शक्यते यत् श्रीकृष्णस्य त्रिविधासु परिचितिषु द्वारिकावासिनः श्रीकृष्णस्य परिचितौ तदीयसामाजिकचरित्रस्य महनीयता प्रकाशिता । किन्तु गोपीजनबल्लभस्य श्रीकृष्णस्य परिचितौ तदीय त्रैलोक्यमोहनतत्त्वं प्रकाश्यते । तस्य गोपलीला त्रैलोक्यमोहनतत्त्वमाधृत्य विद्यते । तया दृष्ट्वा श्रीकृष्णः कदाचित् मोहननाम्ना परिचीयते । श्रीकृष्णोपासनाया अङ्गत्वेन यद्ध्यानं परिकल्पितं तत्र श्रीकृष्णस्य श्रीविग्रहरूपं हृदयस्थं क्रियते । तत्र श्रीकृष्णस्य अत्यन्तसुन्दरतम-युवकावस्थापन्नमुखमण्डलस्य कान्तिः, चन्द्रमण्डलस्य आह्लादकत्वं, वर्तुलत्वं शीतलत्वं च विभर्ति । शिरसि मायूरपुच्छः, नानालङ्कारमाला, वंशी, गोपबालकबालिकापरिवेष्टनं, गोवत्सः सर्वोपरि तदीय दृग्भङ्गी त्रैलोक्य-मोहनतत्त्वस्य एकैको विभावः । शारदातिलके (17. 93)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पुरुषोत्तमोपासनायां श्रीकृष्णत्वेन श्रीपुरुषोत्तमस्य यद्ध्यानं प्रतिपादितं तत् श्रीजगन्नाथस्य अर्चनायामपरिहार्यत्वेन वर्तते[25] । अस्मिन् ध्याने द्विभुज-विशिष्टस्य श्रीपुरुषोत्तमस्य रूपं परिकल्पितम् । श्रीकृष्णत्वेन श्रीपुरुषोत्तमः यस्मिन् यन्त्रे पूज्यते तत् योनियन्त्रमिति नाम । एतत् दशदलविशिष्टपद्मेन परिवेष्टितम् । किन्तु श्रीपुरुषोत्तमजगन्नाथस्य पूजायां त्रैलोक्यमोहनयन्त्रस्य विनियोगात् तत् अष्टदलपद्मेन परिवेष्टितं भवति ।

14. रुद्रयामले श्रीकृष्णस्य या उपासनाप्रणाली प्रदर्शिता सा पुरुषोत्तमकृष्णोपासनत्वेन यदि वाऽभिधीयते तथापि सा शारदातिलक-प्रदर्शितप्रणालीतः किञ्चित् भिन्ना । रुद्रयामले (एवं ध्यात्वा पुरा ब्रह्म-38.32) श्रीकृष्णस्य ब्रह्मत्वेन अभिहितत्वेऽपि षड्दलपद्मे तस्य कामिनीप्राणनिलयत्वेन वर्णनं प्राप्यते । आगमपरंपरायां पुरुषोत्तमोपासनायाः या विकाशधारा परिलक्षिता सा पुरुषोत्तमकृष्णस्य त्रैलोक्यमोहनंविभाव-मुपजीवति यो विभावः श्रीपुरुषोत्तमजगन्नाथस्य अर्चनायामङ्गत्वेन स्वीक्रियते। एतादृश्याः विकाशधारायाः आनुष्ठानिकः परिप्रकाशो जात गरुडपुराणे (पूर्वखण्डे 1.1-7)। श्रीजगन्नाथस्य पुरुषोत्तम-त्रैलोक्यमोहनो-पासनापरंपरागतविधयः आगमपरंपरायाः प्रतीकत्वेन ज्ञायन्ते । तत्र स्वयं हरिणा (श्रीजगन्नाथेन) स्वमुखेन पुरुषोत्तमोपासनाविधयो वर्णिताः ।

15. गोपिकाभिः सह श्रीकृष्णस्य संबन्धः त्रैलोक्यमोहन-तत्त्वाधारेण प्रतिष्ठां प्राप्तः । अतः श्रीपुरुषोत्तमजगन्नाथस्य आगमपरं-परागतोपासनापद्धतौ कृष्ण-त्रैलोक्यमोहनविशिष्टो गोपालमन्त्रः निरूपितो वर्तते । आगमिकस्मार्तपरंपरयाऽपि अयमनुमोदितः । पुनश्च पुरुषोत्तमो-पासनायाः सार्वजनीनता विष्णुपुराणे घोषिता । इतः स्पष्टतया प्रमाणीक्रियते यत् न केवलं पुरुषोत्तमोपासनायां वैयक्तिकेष्टदेवतो-पासनाःपरंपरा उज्जीविता तिष्ठति, अपितु अस्याः एका सामूहिकोपासनापरंपरा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वर्तते यत्र पुरुषोत्तमजगन्नाथस्य श्रीमन्दिरं ब्रह्माण्डस्य, उपासकः पुरुषः श्रीपुरुषोत्तमस्य, उपासकपत्नी लक्ष्म्याः प्रतीकत्वेन स्वीक्रियन्ते । श्रीपुरुषोत्तमजगन्नाथं श्रीलक्ष्मीं चान्तरा संपाद्यमाना लीला उपासकस्य गार्हस्थ्यलीलायाः प्रतीकत्वेन परिचीयते (1.8.35) । त्रैलोक्यमोहनतत्त्वेन सृष्टितत्त्वस्य सूच्यमानत्वात्, सृष्टये मैथुनतत्त्वस्य अनिवार्यतया अवतारणा क्रियते । एतेन हेतुना श्रीपुरुषोत्तमजगन्नाथस्य मन्दिरगात्रेषु उत्कीर्णाया मैथुनकलायाः यथार्थता अनुभूयते[26] । इयं मैथुनकला त्रैलोक्यमोहनतत्त्वस्य बाह्यप्रकाशमात्रम् । त्रैलोक्यमोहनतत्त्वे आकर्षणक्षमताविषयोऽपि विचार-कोटिमागच्छति । आत्मनो मोहनकलया श्रीपुरुषोत्तमजगन्नाथो यमाकृषति स एव तस्य दर्शनसौभाग्यमर्जति ।

16. त्रैलोक्यमोहनतत्त्वस्य, सृष्टितत्त्वस्य, मैथुनतत्त्वस्य च सम्मेलनेन श्रीपुरुषोत्तमजगन्नाथस्य ब्रह्मोत्सवोऽनुष्ठीयते । अस्य परिचिता-भिधानं भवति नवकलेवरोत्सवः । कलेवरनिर्माणं मातृगर्भे भवति । मातृगर्भो भवति सृष्टेः निर्माणशाला । सृष्टिः मैथुनोत्तरकार्यम् । मैथुनं मोहनकलाया उद्देश्यम् । अतः एतेषां त्रयाणां तत्त्वानां समावेशेन नवकलेवरोत्सवोऽनुष्ठीयते ।

17. उपासनायाः माध्यमत्वेन मूर्तेः ग्रहणार्थं पाञ्चरात्रागम-परंपरायां व्यवस्थायाः सत्त्वात् मूर्तेः निर्माणं, परिवर्तनं, प्रतिष्ठा च सर्वथा आगमशास्त्रानुमोदनं लभन्ते । अत्र नवकलेवरपदेन परमात्मनो मूर्तिधारणं जीवात्मत्वेन शरीरग्रहणं वा अवगम्यते । सुतरां निर्माण-परिवर्तन-प्रतिष्ठानां सामूहिकी परिभाषा नवकलेवरशब्देनोच्यते । "भुवनप्रकाश" नामक प्रतिष्ठासंपर्कीयग्रन्थे अर्चनार्थं चतुर्विधा मूर्तयः निश्चीयन्ते । तासु रेखामूर्तिः, दारुमूर्तिः, धातुमूर्तिः (मणिमयमूर्तिः वा), शिलामूर्तिश्चेति[27]।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आसु चतुर्विधासु मूर्तिषु श्रीपुरुषोत्तमजगन्नाथस्य दारुमूर्तिः न केवलं परंपरया स्वीकृता अपि तु आगमशास्त्रोचिता । मणिमयी शिलामयी वा मूर्तिः दशसहस्रसंवत्सरपर्यन्तमुपासनार्हा तिष्ठति । रेखामूर्तिरेकसंवत्सरपर्यन्तमुपास्या भवति । प्रतिवर्षं रेखामूर्तेः परिवर्तनमावश्यकम् । अस्यां स्थितौ धातुमूर्तिः सहस्रसंवत्सरपर्यन्तमुपासनायै गृह्यते । किन्तु दारुमूर्तेः उपासनायै प्रतिष्ठा आभ्यः मूर्तिभ्यः पृथक् । प्रत्येकदारुमूर्तिः सर्वाधिकतया द्वादशवर्षव्यवधानेन परिवर्तनीयत्वमर्हति । इतः पूर्वं यदि मूर्तेः कश्चनावयवो भग्नः क्षुण्णो वा भवति, तर्हि तन्मूर्तेः संस्कारोऽपेक्ष्यते । परवर्तिनि समये मृण्मयमूर्तेः उपासना प्रवर्तिता । इयं मृण्मयी मूर्तिः एकमासपर्यन्तमुपासनार्हा भवति । अर्थात् मृण्मयमूर्तिः प्रतिमासं परिवर्तनमपेक्षते । अनया व्यवस्थया रेखामूर्तेः प्रतिवर्षं, दारुमूर्तेः प्रतिद्वादशवर्षं, धातुमूर्तेः प्रतिसहस्रवर्षं, मणिमयमूर्तेः प्रतिदशसहस्रवर्षं, मृण्मयमूर्तेः प्रतिमासं नवकलेवरोत्सवोऽनुष्ठेयः । उत्कलीयस्मार्तागमपरंपरायां मृणमयमूर्तिपूजा नानुमन्यते ।

18. अस्यामेव स्थितौ इदमेव वक्तुं शक्यते यत् त्रैलोक्यमोहनतत्त्वमुपजीव्य आगमपरंपरायामुपासनाया माध्यमरूपेण श्रीपुरुषोत्तमजगन्नाथस्य दारवविग्रहः स्वीकृतः, किन्तु रेखा-धातु-शिला-मृण्मयमूर्तीनामुपेक्षा किमर्थं कृता इत्यस्मिन् विषये पुनरन्वेषणमपेक्ष्यते । पक्षान्तरे यस्मिन् प्रस्तरगात्रे शैलशिलायां वा श्रीपुरुषोत्तमजगन्नाथस्य श्रीविग्रहस्य उत्कीर्णरूपं वर्तते तस्य उपासनादृष्ट्या वैधानिकी आनुष्ठानिकता नास्ति । सुतरां दारवविग्रह उपासनार्थमपरिहार्य इति स्थिरीकर्तुं शक्यते ।

19. यस्मिन् समये श्रीपुरुषोत्तमजगन्नाथस्य प्रतिष्ठा अभूत् तदानींतनेषु उत्कलेषु द्विविधा सामाजिकी परंपरा समप्राधान्यं लब्ध्वा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अवर्तत । दक्षिणोत्कलेषु पुरुषोत्तमनृसिंहोपासना तदानीं प्रतिष्ठिता आसीत्, उत्तरोत्कलेषु बौधवज्रयानस्य प्रभावः प्राचुर्येण अवर्तत[28] । एतदुपासना-द्वयस्पर्शेन उत्कलीयसाधारणजनजीवनं द्विधा विभक्तमासीत् । तदानीन्तन-गङ्गराजवंशीयशासकैः एतदुभयविधसामाजिकपरंपरयोरेकीकरणं कृतम् । तेन शासनस्य एकरूपता यथा, स्थिरता च तथा आगता । इयमेका राजनैतिकी आवश्यकता आसीत् । इदमत्र अवश्यं वक्तुं शक्यते यत् बौधवज्रयाने मैथुनतत्त्वमुपासनाया एकमपरिहार्यमङ्गम्[29]। पक्षान्तरे पुरुषोत्तमोपासनायां विष्णु-नृसिंह-कृष्ण(श्रीधरः/श्रीकरः)कैन्द्रिकी या भावना आगमशास्त्रसमर्थनं प्राप्ता ततः श्रीपुरुषोत्तमकृष्णस्य त्रैलोक्यमोहनतत्त्व-मनिवार्यत्वेन एकमपरिहार्यं तत्त्वमास्ते । दक्षिणोत्कलेषु प्रतिष्ठितया पुरुषोत्तम-विष्णु-नृसिंहोपासनया सह बौधवज्रयानोपासनां मिश्रयित्वा एकस्याः समन्वितधार्मिकपरंपरायाः सृष्टये पुरुषोत्तमोपासनायां श्रीनृसिंहस्य स्थाने त्रैलोक्यमोहनश्रीकृष्णस्य ग्रहणमभूत् । एतेन बौधवज्रयानस्य मैथुनतत्त्वं पुरुषोत्तमत्रैलोक्यमोहनतत्त्वेन सह सम्बद्धं भवति[30] । वस्तुतः एतत्तत्त्वद्वयस्य समन्वयेन प्रतिष्ठिता श्रीपुरुषोत्तमजगन्नाथोपासनायाः आनु-ष्ठानिकता । अत्रैव पुरुषोत्तम-श्रीकृष्णतत्त्वस्य बौधवज्रयानस्थबुद्धतत्त्वस्य च समरूपताप्राप्त्या श्रीजगन्नाथः श्रीकृष्णत्वेन बुद्धत्वेन च परिचीयते । शारदातिलके[31] प्रतिपादितानामवतारविषयकध्यानानां मध्ये बुद्धावतारस्य यद्ध्यानं प्रकल्पितमस्ति तत्र बुद्धोधीवरत्वेन अर्थात् ज्ञानिबुद्धत्वेन उच्यते, किन्तु जयदेवस्य श्रीगीतगोविन्दे बुद्धशरीर इति उच्यते[32] ।

20. एतत्सम्मिश्रिततत्त्वस्य अधिष्ठातृत्वेन श्रीपुरुषोत्तमजग-न्नाथस्य पूजायां दारुविग्रहस्य ग्रहणीयतायाः कारणमनुसन्धेयम् । श्रीपुरुषोत्तमजगन्नाथस्य मूर्तिपूजार्थं प्राक्प्रवर्तितपुरुषोत्तमनृसिंहतत्त्वं गृहीतं,

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यदाधारेण नवकलेवरधारणे दारुप्रसङ्गस्य अवतारणा सुकरा भवति । श्रीनृसिंहस्य पार्थिवाविर्भावो दारुमयस्तम्भात् अभूत् इति हेतोः श्रीपुरुषोत्तमजगन्नाथस्य दारवविग्रहोऽङ्गीकृतः यदि वा श्रीनृसिंहस्य प्रस्तरमयविग्रहः मणिमयविग्रहोऽपि पूजायामुपयोज्यमानः प्राप्यते । अस्मिन् स्थले श्रीपुरुषोत्तमजगन्नाथस्य उपासनायां प्रस्तरविग्रहस्थाने दारवविग्रहस्य स्वीकारार्थं बौधवज्रयानस्य समर्थनं स्यात् । प्रस्तरात् दारुपदार्थः स्वल्पकालस्थायी । बौधदर्शनस्य क्षणभङ्गवादस्य[33] संपर्कोऽत्र विद्यते इति केचन ऐतिहासिका आमनन्ति । ऐतिहासिकप्रवरस्य डा. सत्यनारायण-राजगुरुमहाभागस्य मतेन श्रीपुरुषोत्तमजगन्नाथस्य प्राग्विग्रहः पाषाणमय आसीत्[34] । अस्माभिः श्रीपुरुषोत्तमनृसिंहस्य श्रीविग्रहः पाषाणमय आसीदिति स्वीकर्तुं शक्यते । किन्तु पुरुषोत्तम-त्रैलोक्यमोहनकृष्णस्य बौधवज्रयानेन सह सम्मेलनात् श्रीपुरुषोत्तमजगन्नाथस्य योऽभिनवपरिप्रकाशो जातस्तेन पुरुषोत्तमोपासनायामेका अभिनवा परंपरा श्रीपुरुषोत्तमक्षेत्रे प्रतिष्ठिता । अस्यां परंपरायां श्रीपुरुषोत्तमजगन्नाथस्य दारवविग्रह ऐकान्तिकत्वेन उपासनायां स्वीकृतः । श्रीपुरुषोत्तमविष्णोः, श्रीपुरुषोत्तम-नृसिंहात्, श्रीपुरुषोत्तमश्रीकृष्णाच्च श्रीपुरुषोत्तमजगन्नाथस्य तत्त्वमानुष्ठानिकी परिचितिश्च भिन्ना सञ्जाता । तस्माद्धेतोः श्रीजगन्नाथस्य कलेवरनिर्माणे दारु अपरिहार्यतया उपयोज्यते । दारुचयने श्रीपुरुषोत्तमकृष्णतत्त्वापेक्षया श्रीपुरुषोत्तमनृसिंहतत्त्वस्य संबन्धोऽधिकः सञ्जातः[35] ।

21. श्रीपुरुषोत्तमजगन्नाथस्य नवकलेवरनिर्माणाय नानाविधेषु प्रसिद्धेषु वृक्षेषु विद्यमानेषु निम्बवृक्षस्य अपरिहार्यता किमर्थमनुभूतेत्यस्मिन् विषये मनसि प्रश्नो जागर्ति । एतस्य प्रश्नस्य उत्तरमस्माभिरित्थमुपस्थापयितुं शक्यते यत् मनुष्यस्य व्यवहारे आगतेषु वृक्षप्रवरेषु केचन विशिष्टा वृक्षाः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सन्ति येषु दैवप्रकाशः घटते[36] । तेषु वृक्षेषु खदिरः उदुम्बर इत्यादयोऽत्यन्तं प्रसिद्धाः । अस्मात् हेतोः श्रौतयागोपकरणार्थमेतद्वृक्षकाष्ठमुपयोज्यते । किन्तु निम्बवृक्षस्य अन्तर्भावोऽत्र नास्ति । परवर्तिनि समये देवतापूजायां निम्बवृक्षस्य व्यवहाराय काचित् योजना कृता यस्मिन् विषये वराहमिहिरस्य बृहत्संहितायामुल्लेखो विद्यते (59.5)[37]। भविष्यपुराणेऽपि सर्ववर्णसाधारणोपास्यत्वेन निम्बादिदारुनिर्मितो विग्रह उपादेय इति भणितिः (निम्बाद्याः सर्ववृक्षाणां वृक्षाः साधारणाः स्मृताः 131.6) प्राप्यते[38] ।

22. अन्ततो गत्वा इदमेव साकल्येन वक्तुं शक्यते यत्

(क) श्रीपुरुषोत्तमजगन्नाथः प्रतिष्ठायां नृसिंहः, वैकल्पिकोपासनायां श्रीकृष्णः।

(ख) तदीयोपासनायां भयमिश्रिता भक्तिरावश्यकी ।

(ग) सर्ववर्णसाधारणोपास्यविग्रहदृष्ट्या निम्बवृक्षोद्भवदारुपदार्थस्य प्रयोजनीयत्वात् साधारणयात्रादिषु स्पृश्यास्पृश्यविवेको नास्ति, इत्थं च गर्भगृहप्रवेशाधिकारः साधारणदर्शनसमये समेषां सुकरः समानश्च।

== 0 ==

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

टिप्पणी

1. S. Radhakrishnan & P. T. Raju, *Concept of Man*, Delhi, 1995. P. 243.
2. N. N. Bhattacharya, *History of Tantric Religion*, Delhi, 1982. P. 4.
3. मनुस्मृतिः 2.6.
4. R. C. Hazra, *Indian Historical Quarterly*, XXXVI. PP. 141-150.
5. श्रुतिर्द्विविधा वैदिकी तान्त्रिकी च हारीतः (मन्वर्थमुक्तावलीकृत स्मृतिवचनम् 2.1)
6. Sarojini Jagannathan, *Impact of Sri Ramanujacharya on Temple worship*, II. P. 3.
7. S. R. Goyal, *Religious History of Ancient India*, II. P.3.
8. Sarojini Jagannathan, P. 20.
9. तत्रैव
10. तत्रैव
11. तत्रैव P. 21.
12. महाभारतशान्तिपर्व. 339. 11-12
13. F. O. Shrader, *Introduction to Pancaratra*, Adyar Sibrary, 1916. PP. 22-26
14. ईश्वरसंहिता. अ.- 21
15. Sarojini Jagannathan. P. 22
16. शारदातिलकः 15, 17 अध्यायौ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

17. G. C. Tripathy, "Concept of Pururotma in Agamas" in *Cult of Jagannath and Regional Tradition of Orissa,* Delhi, 1978. PP. 31-59.

18. तत्रैव

19. तुलनीयम्- श्रीमद्भागवतम्. 8.8. 41-46

20. शारदातिलकः 17. 65

21. G. C. Tripathy. PP. 48-49.

22. तत्रैव

23. द्र. शारदातिलकस्य- नवमपटलः

24. द्र. गोपालमन्त्रः - ओँ क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा । शारदातिलकः 17. 85-87.

25. शारदातिलकस्य राघवभट्टकृतटिप्पणी. 17-93.

26. व्रजकिशोरस्वाईं, पुरुषोत्तमतत्त्वर क्रमविकाश- *श्रीमन्दिर*, पुरी, 1995- रथयात्रासञ्चिका

27. मूर्तिस्तु चतुर्धा प्रोक्ता रेखादारुमयी तथा ।
सौम्या धातुमयी पुण्या मणिशिलामयोत्तमा ।। भुवनप्रकाशः

28. N. K. Sahu, *Buddhism in Orissa,* Bhubaneswar, 1958. PP. 131-34

29. P. V. Kane, *History of Dharmashastra,* Vol-V, P. II, (Poona, BORI)

30. दृढं सारमसौशीय्यमच्छेद्याभेदलक्षणम् ।
अजाहि अविनाशी च शून्यता वज्रमुच्यते ।। अद्वयवज्रसंग्रहः, गावकवार्ड प्राच्यग्रन्थमाला, पृ. 3.

मोहो द्वेषस्तथारागः सदा वज्रे रतिः स्थिता ।
उपायस्तेन बुद्धानां वज्रयानमिति स्मृतम्। गुह्यसमाजतन्त्रम्. पृ.154

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

31. पुरा पुराणानसुरान् विजेतुं
संभावयन् धीवरचिह्नवेशम् ।
चकार यः शास्त्रममोघकल्पं
तं मूलभूतं प्रणतोऽस्मि बुद्धम् ।। शारदातिलकः 17.163

32. निन्दसि यज्ञविधेरहह श्रुतिजातम्
सदय हृदयदर्शितपशुघातम् ।।
केशव ! धृतबुद्धशरीर ! जय जगदीशहरे ।। गीतगोविन्दम्

33. T. R. V. Murti, *Cetral Philosophy of Buddhism*, Georg Allen & Unwin, 1955, P. 196

34. S. N. Rajaguru, *Inscriptions of Sri Jagannath Temple and Origin of Purusottama Jagannath*, Puri, 1992, Introduction.

35. K. C. Mishara, *Cult of Jagannath*, Calcutta, 1984, P. 159

36. द्र. वैखानसागमः - सप्तदशपटलः

37. क्षत्रस्यारिष्टाश्वत्थखदिरबिल्वविवृद्धिकराः ।। बृहत्संहिता. 59.5

38. G. C. Tripathy, P. 234 (F. N. 36).

Professor of Dharmasastra
Sri Jagannath Sanskrit University
Sri Vihar, Puri, 752003.
Phone (Res.) 06752- 251155

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दिग्दर्शिनी / 2004/3
Regd, No.34194/79

अहल्याजार इन्द्रः

जयन्तकुमारत्रिपाठी, वारिपदा

इन्द्रः जायमानः सन् देवानां प्रधानभूतो मनस्विनामग्रगण्यः देवो वृत्रवधादिलक्षणेन कर्मणा सर्वान् देवान् अत्यक्रामत् । यस्य पराक्रमस्य समक्षं द्यावापृथिव्यौ भयेन अवेपेताम्, स बलस्य महत्त्वेन महीयान् इन्द्र इति ज्ञायताम् । स इन्द्रः सहस्राक्षः[1] । वाल्मीकिरामायणे सोऽपि सहस्राक्षः इत्यभिहितः । तत्राहल्योपाख्याने इन्द्रस्याहल्यागमनात् पूर्वं सहस्राक्षनाम्नो-ल्लेखोऽवाप्यते ।

तस्यान्तरं विदित्वा च सहस्राक्षः शचीपतिः ।
मुनिवेषधरो भूत्वा अहल्यामिदमब्रवीत् ।[2]

अहल्याभिगमनापराधाद् महामुनिर्गौतमस्तस्मै इन्द्राय शापं ददौ । तेन च शापेन स विफलोऽर्थात् अण्डकोषरहितः सम्वृत्तः ।

मम रूपं समास्थाय कृतवानसि दुर्मते ।
अकर्त्तव्यमिदं यस्माद् विफलस्त्वं भविष्यसि ।।[3]

क्रुद्धस्यर्षेर्वचनाद् सहस्राक्षस्य वृषणौ भूमौ पेततुः तत्क्षणाद् एव ।

रामायणानुसारं गौतमशापादेवेन्द्रस्य सहस्राक्षत्वं नैव समुद्भूतम् । महाभारते इन्द्रस्य सहस्रलोचनविषये भिन्नतरो वृत्तान्तः कथितः । सुन्दोपसुन्दनिधनहेतुरूपा तिलोत्तमा विश्वकर्मणा यदा सृष्टा तदा तस्या

---

1. अथर्ववेदः 6.4.37.1
2. वाल्मीकिरामायण बालकाण्डम् 48.17
3. तत्रैव 48.27

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अनवद्यरूपसम्भारं द्रष्टुकामौ महेश्वरेन्द्रदेवौ मिषेण चतुर्मुखसहस्राक्षौ संजातौ[4]।

महाभारतेऽसकृदेव इन्द्रेणाहल्या धर्षितेति उल्लिख्यते "अहल्या धर्षिता पूर्वमृषिपत्नी यशस्विनी"[5]। ऋषिगौतमपत्न्या अहल्याया व्यभिचारेण कुपितः सन् स्वपुत्रं चीरकारिणं तां निहन्तुं समादिदेश[6]। इन्द्रस्यायमपराधः। अतः स एव अपराद्धो न माता अपराधिनीति विविच्य चिरकारी मातरं न निजघान। उपाख्यानेऽस्मिन् अहल्यायाः पाषाणीभवनं गौतमस्येन्द्रं प्रत्यभिशाप अनुल्लिखितः। महाभारतकारोऽहल्यां निराकारां निजगाद। नीलकण्ठः निराकाराशब्दस्यार्थं "लज्जया पाषाणीभूताम्" आह।

पद्मपुराणे वर्णितमस्ति यत् गौतमः स्वपत्नीं सहस्रसम्वत्सरं यावत् पाषाणीभवितुं शेपे। त्रेतायां दाशरथीरामस्तामुद्धरितवानिति। पद्मपुराणे सृष्टिखण्डे इन्द्रस्य देहे सहस्राणि भगचिह्नानि देव्याः शच्याः कृपया सहस्रचक्षुष्ट्वेन रूपान्तरितानि इति पौराणिकी वार्त्ता[7]।

इन्द्र एव सविता (सूर्यः)। सोऽयं सूर्यरूपः श्रेष्ठ इन्द्रः रथ्याश्चक्रघूर्णनवत् स्वकीयं तेजः सर्वासु दिक्षु प्रसारयति। अस्थायि सृष्टिस्वरूपाणि कृष्णानि तमांसि स्वज्योतिषा विनष्टानि तेन कृतानि[8]। हे ज्योतिर्मय इन्द्रदेव! भवान् प्रज्ञानरहिताय तमसाछन्नाय जनाय ज्ञानं ददातु, अरूपाय (अपेशसे) रूपं ददातु। प्रत्युषसि प्रकाशमान् भवतु[9]।

---

4. महाभारतस्य आदिपर्व 211.24-28
5. महाभारतस्य उद्योगपर्व 12.6
6. महाभारतस्य शान्तिपर्व 265.7/8
7. पद्मपुराणस्य सृष्टिखण्डः 54.46-47
8. ऐतरेयब्राह्मणम् 10.89.2
9. ऋग्वेदः 1.6.3

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आचार्यः कुमारिल्लभट्ट इन्द्रं सूर्य्यात्मना गृह्णन् अहल्योपाख्यानस्य रुचिरां व्याख्यां प्रददाति । "एवं समस्ततेजाः परमेश्वरत्वनिमित्तः इन्द्रशब्दवाच्यः सविता एव अहनि लीयमानाया रात्रेः अहल्याशब्दवाच्यायाः क्षयात्मकजरणहेतुत्वात् जीर्यति अस्मादनेन वा उदितेनेति अहल्याजारः न परस्त्रीव्यभिचारात् "[10] ।

अहल्या रात्रिशब्दवाच्या । सा च क्षयमुपैति अहनि (निशावसाने) आगते । सा च रूपकेण सवितुर्जाया स्वसेति वा कथ्यते । "स्वसुर्यो जार उच्यते "[11] । अन्तर्हिते शशिनि (गौतमे) उदयाचलमारूढे च सवितरि सा क्षीणीभूता दृष्टिं न नन्दयति संस्मरणीयभोगा तैत्तिरीयसंहितायां शतपथ-ब्राह्मणे च इन्द्रोऽहल्यायै जारः (ravisher) इत्युच्यते । इन्द्रेण (सूर्यात्मना) अहल्या (the shader of night) नीयते। सृष्टेः प्राक् अन्धं तमः आसीत्। " तमः आसीत्तमसा गूढमग्रे " । रामायणे अहल्या ब्रह्मण आद्या सृष्टिरिति वर्ण्यते । सा च सृष्टेः पूर्वावस्थां रात्रिरूपां (night or primeval darkness) निर्दिशति । अपरे केचिदाहुः इन्द्रः वृष्टिदः अन्नस्योत्पादयिता । इरां दृणाति" अर्थात् इरामन्नमन्नस्य हेतुभूतं मेघं शस्यबीजं वा विदारयतीति इन्द्रः वृष्टेर्देवता । कर्षणायोग्या भूमिरहल्या (न-हल्+यत्+टाप्) । तदर्थं स वृष्टिं प्रदाय उर्वरितां करोति इति ।

वस्तुत इन्द्रः सूर्यः अहल्या रात्रिरूपेति रूपकमात्रं सूर्योदये सति रात्रिरदृश्यतामुपैति । वार्त्तामिमामवलम्ब्य अहल्योपाख्यानं कल्पितम् इति निश्चप्रचम् ।

***

---

10. तन्त्रवार्त्तिकं कालेमहोदयेन समुद्धृतम् ।
11. ऋग्वेदः 6.55.4

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दिग्दर्शिनी / 2004/3
Regd, No.34194/79

ध्यानविमर्शः

इन्दुलतादास, दिल्ली

"ध्यै" धातोः ल्युट्प्रत्ययोगेन 'ध्यान'शब्दः निष्पद्यते । निरवच्छिन्ना भावना ध्यानमिति वक्तुं शक्यते । मनुष्यस्य व्यावहारिकजीवने आध्यात्मिकजीवने च ध्यानस्य महती आवश्यकता वर्तते । ध्यानपूर्वकं सम्पादितं कर्म आशानुरूपं फलं प्रसूते । तद्विपरीतरीत्या साधितं कर्म न केवलमिष्टं फलं जनयति अपितु कदाचित् महतोऽनर्थस्य कारणमपि भवतीति सर्वविदितम् ।

सर्वैरपि भारतीयदर्शनसम्प्रदायैः ध्यानस्य उपयोगिता बहुशोऽङ्गीकृता । न केवलं भारतीयदर्शनेषु अपितु विश्वस्य अन्येषु आध्यात्मिकसंप्रदायेषु अपि ध्यानं महत् स्थानमधिकरोति । ग्रीक्-ख्रीष्टियान्-यहूदी-चीनादिषु आध्यात्मिकसंप्रदायेषु ध्यानस्य महान् आदरः दृश्यते ।

वस्तुतः मार्गः कोऽपि भवतु नाम ध्यानं विना आत्मसाक्षात्कारः मोक्षो वा न सम्भवतीति निश्चितम् । तस्मादुच्यते विद्यारण्यमुनिना-

यथागाधनिधेर्लब्धौ नोपायः खननं विना ।
मल्लाभेऽपि तथा स्वात्मचिन्तामुक्त्वा न चापरः [1] ।।

यथा भूमिगतस्य निधेः लाभाय खननमेव उपायः, खननं विना यथा तद् धनमुपायान्तरेण नैव प्राप्तुं शक्येत तथैव ध्यानाभ्यासं विना आत्मसाक्षात्कारस्य उपायान्तरं नास्ति ।

---

1. पञ्चदशी 9.153

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ध्यानलक्षणम् - निरवच्छिन्ना भावना ध्यानमिति पूर्वमुक्तम् । मण्डलब्राह्मणोपनिषदि उच्यते- 'सर्वशरीरेषु चैतन्यैकतानता ध्यानम्' [1] । योगसूत्रानुसारेण- "तत्र प्रत्ययैकतानता ध्यानम्" [2] । प्रत्ययस्य नाम चैतन्यस्य एकतानता नाम निरवच्छिन्नता एव ध्यानम् । यदा इन्द्रियाणां कार्यान्तराव्यापृतित्वात् चैतन्यस्य विभाजनं न भवति अपितु एकस्याः भावनायाः निरन्तरप्रवाहः भवति सा अवस्था ध्यानमित्युच्यते ।

योगशास्त्रे ध्यानस्य महत् प्राधान्यं दृश्यते । अष्टाङ्गयोगस्य अष्टानामङ्गानां मध्ये ध्यानं सप्तमम् । तान्यष्टावाङ्गानि- यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः । अर्थात् यमनियमासनप्राणायामप्रत्याहारधारणानाम् अभ्यासात् परमेव ध्यानस्याभ्यसनं क्रियेत ।

तत्र यमाः पञ्च । अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाभिधाः । नियमाश्च पञ्च । शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि । स्थिरसुखमासनम् । श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः । स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकारः इवेन्द्रियाणां प्रत्याहारः । देशबन्धश्चित्तस्य धारणा । एतेषां योगाङ्गानामनुष्ठानात् पश्चादेव ध्यानस्य अनुष्ठानं भवति ।

ध्यानाभ्यासस्य स्थानम् - ध्यानाभ्यासार्थम् अनुकूलस्य स्थानस्य महती आवश्यकता वर्तते । यत्र कुत्रापि ध्यानं न सम्भवति । ध्यानार्थं स्थानचयने महान् यत्नः करणीयः । ध्यानार्थमुद्दिष्टस्य स्थानस्य विशेषलक्षणानि भवन्ति। प्रथमतः एतत् स्थानं पवित्रं स्यात् । अशुचौ देशे ध्यानं न कर्तव्यम् । भूमिः समतला स्यात् । तत्र लघुदृषदः वालुकाः वा न स्युः । तत्र तदन्तिके वा बह्निः न स्यात् । तत्पार्श्वे जलाश्रयादिः न स्यात् येन जनानां समागमात् कोलाहलः भवेत् । ध्यानस्थानं सर्वथा शान्तं शब्दरहितं स्यात् । तत्र दृश्यं

---

1. उपनिषत्संग्रहः (दिल्ली, 1996)
2. यो. सू. 3.2

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चक्षुषोः अनुकूलं स्यात् न च चक्षुष्पीडनकारि किञ्चित् दृश्यं तत्र स्यात् । एवं निर्जनेषु गुहादिषु ध्यानं कर्तव्यम् । तदुक्तं श्वेताश्वेतरे-

समे शुचौ शर्कराबह्निबालुका-
विवर्जिते शब्दजलाश्रयादिभिः ।
मनोऽनुकूले न तु चक्षुःपीडने
गुहानिवाताश्रयणे प्रयोजयेत् [1] ।।

गीतानुसारेण ध्यानार्थमुद्दिष्टं स्थानं नान्युच्छ्रितं नातिनीचं स्यात् । अनावृतायां भूमौ च ध्यानं न करणीयम् अपितु चैलासनम् अजिनासनं कुशासनं वा भूमौ प्रसार्य तदुपर्युपविश्य ध्यानमभ्यसनीयम् । तथा चोक्तम्-

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नाप्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् [2] ।।

उपवेशनविधिः - योगासनस्थः एव योगी ध्यानम् अभ्यसेत् । ध्यानार्थं पद्मासनसुखासनवत् सुखकरम् आसनं युक्तम् । यतः ध्यानाभ्याससमये योगिनः कायशिरोग्रीवाः समरेखावस्थिताः स्युः । तदुक्तं गीतासु-

उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ।
समं कायशिरोग्रीवं धारयन्नचलं स्थिरम् [3] ।।

दृष्टिः - ध्यानावस्थायां योगिनः नयने निमीलिते भवितुमर्हतः अथवा तस्य दृष्टिः नासिकाग्रवर्तिनी स्यात् । योगी इतस्ततः दृष्टिं न प्रक्षिपेत् । तदुक्तं गीतासु- संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् [4] ।

---

1. श्वेताश्वतरोपनिषद् 2.10
2. गीता - 6.11
3. गीता - 6.12
4. गीता - 6.13

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ध्यानस्य प्रारम्भः - ध्यानस्य प्रारम्भोऽपि विधिवत् करणीयः । ध्यानाभ्यसनात् प्राक् देवस्य सवितुः स्मरणं कर्तव्यम् । तदनन्तरमेव ध्यानं प्रारब्धव्यम् । श्वेताश्वतरोपनिषदि अस्य विशदं विवरणं प्राप्यते ।

ध्यानविधाः - ध्यानं त्रिविधं- स्थूलध्यानं, ज्योतिर्ध्यानं, सूक्ष्मध्यानं च । तत्र स्थूलध्यानं मूर्तिमयं भवति । कस्मिन् अपि स्थूले वस्तूनि चित्रमाधाय तस्य एव निरवच्छिन्नं चिन्तनं क्रियते । विष्णुशिवादीनां देवानां सरस्वतीदुर्गादीनां देवीनाम् अथवा हनुमदादीनामन्येषाम् इष्टदेवानां ध्यानं कर्तुं शक्यते । ध्यानसमये इष्टदेवानां वपुषां वैशिष्ट्यानि तत्संपृक्तानि अन्यानि तत्त्वानि ध्यातुं च युज्यन्ते । स्थूलध्याने न केवलमीष्टदेवानाम् अपितु कस्यापि स्थूलवस्तु वृक्षस्य शिलायाः कस्यापि नरस्य इतरप्राणिनः वा ध्यानं कर्तुं शक्यते ।

ज्योतिर्ध्यानम् - ज्योतिर्ध्याने योगी चक्षुषी निमीलयन् चैतन्यं भ्रुवोर्मध्ये केन्द्रीकरोति । गीतासु उच्यते- 'भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्'[1] । इति

सूक्ष्मध्यानम् - सूक्ष्मध्याने कुण्डलिन्याः ध्यानं क्रियते । उक्तं च घेरण्डसंहितायाम्- 'सूक्ष्मं विन्दुमयं ब्रह्म कुण्डली परदेवता'[2] । हठयोगस्य मतानुसारेण कुण्डलिनी-नाम्नी शक्तिः मानवशरीरे सुप्तावस्थायां तिष्ठति । प्राणायामस्य अभ्यासात् सा शक्तिः जागर्ति षट् चक्राणि च विभिद्य सा मस्तकस्थं सहस्रारचक्रं गच्छति । तानि षट् चक्राणि मूलाधारस्वाधिष्ठान-मणिपुरानाहतविशुद्धाज्ञाचक्रनामभिः ख्यातानि । तत्र आद्यं मूलाधारचक्रम्। तस्य स्थानं गुह्यद्वारम् । द्वितीयस्य स्वाधिष्ठानस्य स्थानं जननेन्द्रियम् । मणिपुरचक्रमुदरस्य निम्नभागे वर्तते । अनाहतचक्रस्य स्थानं नाभिप्रदेशः । हृदये विशुद्धाख्यस्य चक्रस्य स्थानं विद्यते । आज्ञाचक्रं भ्रुवोर्मध्यवर्ति ।

---

1. गीता- 8.10
2. घेरण्डसंहिता- 6.1

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सुप्ता कुण्डलिनी मूलाधारे तिष्ठति, प्राणायामाभ्यासेन सा जागर्ति क्रमेण एकैकं चक्रं भित्त्वा सहस्रारं गच्छति । कुण्डलिन्यां ध्यानं सूक्ष्मध्यानं भवति।

सगुणनिर्गुणध्यानम् - पुनश्च सगुणनिर्गुणभेदेन ध्यानं द्विधा विभज्यते । निर्गुणध्याने 'अहं ब्रह्मास्मि' इति जीवब्रह्मणोः अभेदः एव ध्यानविषयः भवति । सगुणध्याने तु ब्रह्मणः स्थूलरूपाणि ध्यानविषयाः भवन्ति । तदुक्तं विष्णुपुराणे- न तद् योगयुजा शक्यं नृप ! चिन्तयितुं यतः ।

ततः स्थूलं हरेः रूपं चिन्तयेद् विश्वगोचरम्[1] ।।

ओङ्कारध्यानम् - सर्वविधेषु सगुणनिर्गुणध्यानेषु ओंकारध्यानं श्रेष्ठम् । ओंकारश्रेष्ठत्वं प्रतिपादयता भगवता मृत्युना नचिकेतसं प्रति उक्तम्-

सर्वे वेदा यत् पदमामनन्ति
तपांसि सर्वाणि च यद् वदन्ति
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं सग्रहेण ब्रवीम्योमित्येतत्[2] ।

पुनस्तत्रैवोच्यते- एतदालम्बनं परमेतदालम्बनं महत् ।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते[3] ।।

प्रणवध्यानं सगुणरूपेण निर्गुणरूपेण च गृह्यते[4] । यतः ओंकार एव सगुणब्रह्म ओंकार एव निर्गुणब्रह्म । उक्तं माण्डूक्यकारिकायां-

"प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः"[5] ।

---

1. विष्णुपुराणम् (6.7.55)
2. कठोपनिषद् 1.2.15
3. कठोपनिषद् (1.2.16)
4. प्रणवोपास्तयः प्रायो निर्गुणा एव वेदगाः ।
   क्वचित् सगुणताप्युक्ता प्रणवोपासनस्य हि ।। पञ्चदशी 9.14
5. माण्डूक्यकारिका 1.26

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ओंकार एव आत्मा । ओंकार एव इदं सर्वम् । तदुक्तं माण्डूक्योपनिषदि- ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद् भविष्यदिति सर्वमोङ्कार एव ।

माण्डूक्योपनिषदनुसारेण आत्मनः चत्वारः पादाः भवन्ति । ते च वैश्वानरतैजसप्राज्ञतुरीयनामानः । एते पादाः ओंकारस्य अ उ म इति मात्राभिः अभिव्यज्यन्ते[1] ।

वैश्वानरपादः - आत्मनः प्रथमः पादः वैश्वानरनाम्ना ज्ञायते । अयं जागरितस्थानः बहिष्प्रज्ञश्च । अस्य सप्त अङ्गानि सन्ति । तानि आकाशसूर्यवायुद्यौजलपृथिवीग्नयः । अस्य एकोनविंशतिमुखानि भवन्ति । तानि- दश इन्द्रियाणि, पञ्च प्राणाः मनो बुद्धिरहंकारः चित्तं चेति । अयं स्थूलभुक् । स्थूलवस्तूनि अस्य ग्रहणविषयाः । अयः पादः ओंकारस्य 'अ' इति मात्रा एव ।

तैजसः - ब्रह्मणः द्वितीयः पादः तैजसनाम्ना ख्यायते । वैश्वानरवत् अस्यापि आकाशादीनि सप्ताङ्गानि इन्द्रियादीनि एकोनविंशतिमुखानि[2] । अयं स्वप्नस्थानः । सूक्ष्मवस्तून्यस्य ग्रहणविषयाः । अयम् अन्तःप्रज्ञः । अयं पादः ओंकारस्य 'उ' मात्रा एव ।

प्राज्ञः - ब्रह्मणः तृतीयः पादः प्राज्ञनाम्ना ख्यातः । अस्य स्थानं सुषुप्तिः । अयम् आनन्दभुक् प्रज्ञानघनः । यथा शस्यपरिमापनार्थं यवाः 'प्रस्थ' इति पात्रविशेषे परिपूर्य निःसार्यन्ते तथैव वैश्वानरतैजसौ प्राज्ञे विलीयेते पुनः उत्पद्येते । ओंकारस्य 'म' इति मात्राद्वारा अयं पादः अभिव्यज्यते । यथा वैश्वानरतैजसौ प्राज्ञे प्रविश्य निःसरतः तथा उच्चारणकाले 'अ' 'उ' इति मात्रे 'म' मात्रायां पुनः पुनः प्रविश्य निःसरतः ।

2. बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च दश, वायवश्च प्राणादयः पञ्च,
मनो बुद्धिरहंकारश्चित्तमिति मुखानि (माण्डूक्य-शंकरः 1.3)

---

1. मा. उ. 1

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तुरीयपादः - पूर्णः ओङ्कारः ब्रह्मणः चतुर्थः पादः । तदुक्तं माण्डूक्य-कारिकायाम्- अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः[1] ।
पुनश्च तत्रैव- अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः[2] ।

एवं रूपेण ओंकारस्य चतुर्णां भागानां ब्रह्मणः चतुभिः पादैः सह एकरूपत्वात् प्रणवः एव ब्रह्म । तस्मात् प्रणवध्यानमेव श्रेष्ठध्यानम् । सर्वेषु शास्त्रेषु प्रणवध्यानस्य प्रशक्तिः विहिता । उक्तं च मुण्डकोपनिषदि-

धनुर्गृहीत्वोपनिषदं महास्त्रं
शरं ह्युपासान्निशितं संधयीत ।
आयम्य तद्भावगतेन चेतसा
लक्ष्यं तदेवाक्षरं सोम्य विद्धि ।।

पुनस्तत्रैव-

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ।।

प्रयाणकाले प्रणवध्यानेन परमागतिर्लभ्यते इत्युद्घोषितं गीतायाम्-

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ।।

ध्यानाभ्यासात् चित्तं शान्तं, समाहितं, प्रसन्नं भवति । जीवनं व्यवस्थितं भवति, ध्यानं भुक्तेः प्रकृष्टं साधनं मुक्तेरपावृतं द्वारं च इति ।

---

1. मा. का. 1.29
2. मा. का. 1.29

***

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दिग्दर्शिनी / 2004/3
Regd, No.34194/79

किशोरचन्द्रानन्दचम्पूः (ढ)

मूलरचयिता- कविसूर्य्यबलदेवरथः

(सं) चायं चायं मयोच्चैः कथितमकपटं चाटुमाकर्ण्य भूयः
पायं पायं च दृष्ट्या मम तनुमतनुक्रूरनाराचभिन्नाम्
सानुक्रोशेन सानुग्रहमहह मम प्राणविश्राणनौत्का-
मिच्छां तुच्छां विधाय क्षिपसि सुमुखि किं रोषरुक्षं कटाक्षम् ।

मीनाङ्ककङ्कपत्रदूनात्मनः कथमार्त्तस्य विषये कार्त्तस्वरगौराङ्गीभिरकारुणिक-हृदयवृत्तित्वमुरीक्रियत इति ब्रुवति किशोरशिरमणौ सस्मितत्वरं ललिता ।

(उत्कलभाषया) रागो देशाक्षः

ढाले त ढालिलु नाहिँ कृपासुधा झरिकि रे- (घोषापद)
ढक्का वाजुथाइ व्रजे ललितार हृदम्वुजे
करुणा अछि वोलि या नेला के ता हरिकिरे -१
ढोलाइला परि ढलि तले पडियिवा भलि
हेलिनि ये कुन्दकलिदशन ए सरिकि रे - २
ढुलाइ देले तृषित चकोर चञ्चुरे शीत-
भानु चन्दिकाकु वित्त याए किछि सरिकिरे - ३
ढोकुटिकु सिनाहटि मो सा याउछि तुटि
पिइ दिअन्तिकि गोटि याक से किशोरी किरे- ४
ढवातनाविरु गोपनगरीर वन्दे भूप
वालुकेश देव नीपकुञ्जपुञ्जसरिकि रे - ५

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृतानुवादकः - श्रीवैकुण्ठविहारिनन्दः

झारयसि न च सकृत् कृपासुधाझरीं किमु- (ध्रुवपदम्)
ढक्का निनादिता व्रजे ललिताया हृदम्बुजे
करुणाऽस्तीति योदिता साऽपि केन हृता किमु - १
दोलन्नेव स्वापदोलं पतन्निव च भूतलं
भवामि कुन्ददशने न दृष्टो मादृशः किमु- २
ढोक्यते यदि तृषितचकोरचञ्चुके शीत-
किरणचन्द्रिका वित्तक्षयो वा ते भवेत् किमु- ३
स्तोकमात्रं विना पानं बलं भवति मे क्षीणं
तामेव किशोरीं पूर्णमात्मना वा पिबे किमु- ४
गोपसौधवातायनानीपनिकुञ्जवनं
बालुकेशः प्रतिदिनं क्षणैकं वन्दते किमु - ५

~0~

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्यामाविषयकं भक्तिसंगीतम् (प्रचलितम्)

मूलम् (वङ्गभाषात्मकम्)

आमार साध ना मिटिल आशा ना पूरिल
सकलि फुराये याय मा ।
जनमेर शोध डाकि गो मा तोरे
कोले तुले निते आय मा ।
पृथिवीर केउ भालो तो वासेना,
ए पृथिवी भालोवासिते जाने ना ।
येथा आछे शुधु भालोवासावासि
सेथा येते प्राण चाय मा ।
बड ज्वाला सये वासना त्यजेछि,
बड दागा पेये कामना भुलेछि ।
अनेक केँदेछि काँदिते पारिना,
बुक फेटे भेङे याय मा ।

संस्कृतानुवादः (मूलभावानुसारी)

देवार्चना सरकार

मम विफलोऽभिलाष आशा विफला सर्वं भाति शून्यम् ।
अन्तिमार्तिरियं जननि दयामयि देहि क्रोडम् ।।
इयं धरणी प्रेमहीना प्रेमहीना अखिलस्वजनाः ।
यत्र प्रेम परिविलसति तत्र नय मा तूर्णम् ।।
दुःखदाहेन वासना विलीना शोकतापेन कामनापि क्षीणा ।
रोदनजलधिपारमेत्य हृदयं मे विचूर्णम् ।।

-XX-

[अत्रेदमवधेयम्- अनुवादोऽयं मूलसंगीतस्य स्वरानुसारं गातुं शक्यते]

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य

-जन्मपत्रिका-*



सूर्ये युग्मयुते विधौ तनुगते सिंहे चं लग्ने शुभे
भौमे भाग्यपतौ बुधे धनपतौ चाये रवेः सङ्गमे ।
योगे सौरिगुरौ भृगौ व्ययगते राहुग्रहे सुस्थिते
न्यस्तः संस्कृतविश्वविद्यनिलयः पुर्यां दिने मङ्गले ।।

✓अध्यापकसोमनाथदाशः
श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठम्, पुरी ।

---

* विश्वविद्यालयस्य प्रतिष्ठा 07-07-1981 इति दिवसे भगवतः श्रीजगन्नाथस्य रथयात्रायाः पञ्चमेऽहनि हेरापञ्चम्यां संवृता । तदानीं जन्मपत्रिकेयं प्रणीता ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दिग्दर्शिनी

नियमावली

क) लेखकाः कर्गजपन्नस्य एकस्मिन् पार्श्वे लेखान् लिखित्वा प्रेषयेयुः ।

ख) कविताया: आयामः एकापार्श्वात्मकः स्यात् ।

ग) पाठकानां समालोचनावर्जितं संक्षिप्तं मतं प्रकाश्यते ।

घ) पत्रिकायाः अग्रिममूल्यं न स्वीक्रियते ।

ङ) वार्षिक शुल्कम् - Rs. 50/-

च) आजीवनशुल्कम् - Rs. 500/-

छ) पृष्ठपोषकताशुल्कम् - Rs. 1000/-

सम्पर्कसङ्केतः
आचार्यः डक्टरब्रजकिशोरस्वाईं
सम्पादकः, दिग्दर्शिनी
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, शांतिविहारः, पुरी, दूरभाषः - (06752) 251155

Printed Book - Post
लिखभाषा - वि.सं.प्र. रामनगर दुर्ग, वाराणसी - २२१००८

Edited, Printed & Published by Prof. B.K. Swain on behalf of Utkal Sanskrit Research Society, Puri. Regd.-34194/79

Kashi Maharani Collection, Ramnagar Fort, Varanasi